शुद्धिमभीप्सता:” मनुः ङीषन्तः “ऋग्यजुःसामरूपे २वेदत्रये त्रित्वसंख्यान्विते ऋगादिवेदेषु अमरः “एतद्विदन्तो विद्वांसस्त्रयीनिष्कर्षमन्वहम्” “त्रैविद्येभ्यस्त्रयीं विद्याद्दण्डनीतिञ्च शाश्वतीम्” मनुः। “ब्रह्माऽथ पुरुषो रुद्रस्त्रयमेतत् त्रयीमयम्। ऋग्भ्यो ब्रह्मा स्थितो विष्णुर्यजुर्मयः। रुद्रः साममयोऽन्नाय तस्मात् तस्याशुचिर्ध्वनिः” मनुः। ४पुरन्ध्र्यां ५सुमतौ स्त्र्यां विश्वः ६सोमराजीवृक्षे स्त्री शब्दच०। ७भवान्याम् दुर्गायाम्। यथा “ऋग्यजुःसामभागेन साङ्गवेदगतापि या। त्रयीति पठ्यते लोके दृष्टा दृष्टार्थसाधिनीति” देवीपु०।

**त्रयःपञ्चाशत्** स्त्री त्र्यधिका पञ्चाशत् त्रिशब्दस्य त्रय आदेशः। (तिपान्न) १त्र्यधिकपञ्चाशत्संख्यायां २तत्संख्यान्विते च बहुत्वेऽप्येकत्वम्। एवं त्रयोदशत्रयोविंशतित्रयस्त्रिंशत् त्रयश्चत्वारिंशत् प्रभृतयः त्र्यधिकदशादिसंख्यायां तत्संख्येये च। इयांस्तु भेदः अशीतिभिन्ने चत्वारिंशदादौ वा त्रय आदेशः। तेन पक्षे त्रिचत्वारिंशादित्यादि तत्रार्थे अशीतौ नेति त्र्यशीतिः।

**त्रययाय्य** पु० त्रयं जन्मत्रयं याति या--बा० आय्य। जन्मत्रयप्राप्ते “स्तनुर्न त्रययाय्यः” ऋ० ६।२।७। “त्रययाय्यो जन्मत्रयं प्राप्तः। जन्मत्रयं स्मर्यते। मातुरग्रेऽधिजननात् द्वितीयं मौञ्जिबन्धनात्। तृतीयं यज्ञदीक्षाया इति जन्मत्रयं स्मृतमिति” तादृशः पुत्र इति” भा०।

**त्रयस्त्रिंश** त्रि० त्रयस्त्रिंशत्+पूरणे डट्। त्र्यधिकत्रिंशत्संख्यापूरणे स्त्रियां ङीप्।

**त्रयस्त्रिंशत्पति** पु० त्रयस्त्रिंशतो देवानां पतिः। १इन्द्रे हेमच०। २प्रजापतौ च तयोः त्र्यधिकत्रिंशतो देवानां पतित्वात् तथात्वम्। देवानां त्रयस्त्रिंशत्त्वं तु

“अष्टौ वसवः एकादश रुद्रा द्वादशादित्या इमे एव द्यावा पृथिवी त्रयस्त्रिंश्यौ, त्रयस्त्रिंशद्वै देवाः प्रजापतिश्चतुस्त्रिंशस्तदेनं प्रजापतिम्” शत० ब्रा० ४।५।६।२। “कतमे ते त्रयस्त्रिंशदित्यष्टौ वसव एकादश रुद्रा द्वादशादित्यास्त एकत्रिंशत् इन्द्रश्चैव प्रजापतिश्च त्रयस्त्रिंशाविति” शत० ब्रा० ११।६।३।५। तु अन्यथोक्ता अस्मिन् पक्षे निर्द्धारणसप्तम्यासमासात् इन्द्रप्रजापतिपरत्वम् तयोस्तेषां मध्ये श्रेष्ठत्वेन पतित्वात्तथात्वमिति बोध्यम्। “आदित्यांश्च वसूंश्चैव रुद्रांश्चैवाश्विनावपि” रामा० ३। २०। अन्यथा संख्योक्ता।

**त्रयस्त्रिंशस्तोम** पु० त्रयस्त्रिंशत् स्तोमा अस्य पृषो०। यज्ञभेदे। “त्रयस्त्रिंशस्तोमेन शोणः सात्रासाहः पाञ्चालो राजा। तदेतद्गाथयाऽभिगीतम् “सात्रासाहे यजमानेऽश्वमेधेन तौर्वशाः। उदीरते त्रयस्त्रिंशाः षट् सहस्राणि वर्मिणाम्” शत० ब्रा० १३।५।४।१६।

**त्रयस्त्रिंशिन्** न० त्रयस्त्रिंशत् ऋचः सन्त्यस्मिन् इनि डिच्च। त्रयस्त्रिंशदृगभिगीयमाने सामभेदे। “त्रयस्त्रिंशि नाम साम माध्यन्दिने पवमाने भवति” तैत्ति० १।२।२।४

**त्रयीतनु** पु० त्रयी वेदा एव तनुरस्य। १सूर्ये हला०। “स्वर्गद्वारं त्रय्या विद्यया भगवन्तं त्रयीमयं सूर्यमात्मानं यजन्ते” भाग० ५।२०।७। तस्य त्रयीमयत्वोक्तास्तथात्वम्।

**त्रयीधर्म्म** पु० त्रय्या वेदत्रयेण विधीयमानो धर्मः शाक०। वैदिके धर्मे ज्योतिष्टोमादौ अमरः।

**त्रयीमय** पु० त्रय्यात्मकः मयट्। १सूर्ये त्रयीतनुशब्दे उदा० २त्रयीधर्म्मात्मके त्रि०। “एवं मुहूर्त्तेन चतुस्त्रिंशल्लक्षयोजनान्यष्टशताधिकानि सौरो रथस्त्रयीमयोऽसौ चतसृषु परिवर्त्तते पुरीषु” भाग० ५ २१।१७। “त्रयीमयं रूपमिदञ्च शौकरम्” इत्युक्ते वाराहे ३रूपे न०तद्रूपविवृतिस्तत्रैव “स्रुक्तुण्ड आसीत् स्रुव ईश! नासयोरिडोदरे चमसाः कर्णरन्ध्रे। प्राशित्रमास्ये ग्रसने ग्रहास्तु ते यच्चर्वणं ते भगवन्नग्निहोत्रम्। दीक्षानुजन्मोपसदः शिरोधरं त्वं प्रायणीयोदयणीयदंष्ट्रः जिह्वाप्रवर्ग्यस्तव शीर्षकं क्रतोः सत्यावसथ्यं चितयोऽसवो हि ते। सोमस्तु रेतः सवनान्यवस्थितिः संस्थाविभेदास्तव देव! धातवः। सत्राणि सर्वाणि शरीरसन्धयस्त्वं सर्वयज्ञक्रतुरिष्टिबन्धनः। नमो नमस्तेऽखिलमन्त्रदेवताद्रव्याय सर्वक्रतवे क्रियात्मने” भाग० ३।१३।४०। ४परमेश्वरे च पु०। “स एष आत्मात्मवतामधीश्वरस्त्रयीमयो धर्ममयस्तपोमयः” भाग० २।४।१९।

**त्रयीमुख** पु० त्रयी मुखेऽस्य। विप्रे हेमच०।

**त्रयोदशन्** त्रि० त्रयश्च दश च, त्र्यधिका वा दश शाक० त्रय आदेशः। १त्र्यधिकदशसङ्ख्यायां २तत्संख्यान्विते च। “क्वचित् द्वादश मासाः संवत्सराः क्वचित् त्रयोदश मासाः” श्रुतिः म०त०। ततः पूरणे डट्। त्रयोदश तत्पूरणे त्रि० “ज्यैष्ठे ज्येष्ठस्य कुर्वीत त्रयोदशदिनात् परम्” ज्यो० स्त्रियां ङीप्। सा च चन्द्रस्य त्रयोदशकलाक्रियात्मके तिथिभेदे सा च स्मरतिथिः तत्रैव तस्योत्पत्तेः। “त्रयोदशी पञ्चदशी च माघे” मन्वादिकथने “वरुणेन समायुक्ता मधौ कृष्णा त्रयोदशी” वारुणीकथने च ति०त०।

**त्रय्यारुण** पु० मान्धातृवंश्ये त्रिधर्मणः सुते नृपभेदे “राज-